17-08-2020

अनिवार्यपत्रम्।
व्याकरणछात्रेभ्यः।

शास्त्री-II

रघुवंशम्। श्लोकव्याख्या।

" सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा।
नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः॥"

सन्दर्भः→ कुलगुरुकविकालिदासप्रणीतस्य रघुवंशमहाकाव्यस्य इन्दुमतीस्वयंवरवर्णनात् षष्ठसर्गादुद्धृतोऽयं श्लोकः।

प्रसङ्गः→ स्वयंवरस्थले सुनन्दा या इन्दुमत्याः परिचारिका सखी वा आसीत्, सा इन्दुमतीं प्रति यथाक्रमं राजपरिचयं कारयामास। इन्दुमती राजानं विहाय तथैवाग्रे गतवती यथा नदीमार्गे वर्तमानं पर्वतं परित्यज्य पुरो गच्छति।

अन्वयः→ पतिंवरा सा रात्रौ सञ्चारिणी दीपशिखा इव यं यं व्यतीयाय (गता), स स भूमिपालः नरेन्द्रमार्गाट्ट इव विवर्णभावं प्रपेदे।

शब्दार्थः व्याकरणञ्च→ पतिंवरा → पतिं वृणोति इति = स्वयंवरा। सा = इन्दुमती। रात्रौ = रजन्याम्। सञ्चारिणी = विचरणशीला। दीपशिखा → दीपस्य शिखा = अर्चिः ज्वाला। इव = यथा। यं यं = राजानम्। व्यतीयाय = व्यतिक्रम्य, परित्यज्य, निर्गता। सः सः = राजा। भूमिपालः = नरेशः। नरेन्द्रमार्गाट्ट → नरेन्द्रस्य मार्गे अट्टः = राजपथगृहम्। इव = यथा। विवर्णभावं = कान्तिहीनत्वम्। प्रपेदे = लेभे।

तात्पर्यः→ इन्दुमती दीपशिखा इव। यथा दीपशिखा उज्ज्वलवर्णा, कृशा, कम्पायमाना तथैव इन्दुमती तथा च तस्याः गमनम्। यथा प्रकाशपुञ्जे गते राजपथस्थितगृहाणि प्रकाशहीनानि भवन्ति तथा राजानः इन्दुमत्योपेक्षया कान्तिहीनत्वम् लभन्।

विशेषः→ अस्मिन् श्लोके विप्रलम्भशृङ्गारः, वैदर्भीरीतिः, प्रसादगुणः, उपमालंकारः, उपजातिछन्दश्च।

17-08-2020

डॉ॰ निर्मलकुमार झा, (स॰ प्राचार्यः)
रा॰उ॰सं॰ महावि॰ सुखसेना, पूर्णियाँ।

संस्कृतसामान्यम् । उपशास्त्री - II 17-08-2020

अनिवार्यपत्रम् । तद्धितप्रत्ययः । (II)

1. अश्वपत्यादिभ्यश्च → प्राग्दीव्यतीयेष्वर्थेषु (अपत्यम्, देवता, भवः, जातिः) अश्वपत्यादिषु (पदेषु) शब्देषु 'अण्' प्रत्ययः स्यात् । यथा → अश्वपतेः पुमान् इति आश्वपतम् । अश्वपति ङस् अण् (अ) = अश्वपति ~~ङस्~~ अ, वृद्धिः, इकार लोपः आश्वपतम् ।

एवं प्रकारेण गाणपतम्, धानपतम् आदयः ।

2. ओर्गुणः → उवर्णान्तस्य भस्य गुणस्तद्धिते । यथा → उपगोः अपत्यम् = औपगवः । उपगु + अण् ।

3. शिवादिभ्योऽण् → अपत्ये शिवादिभ्यः अण् स्यात् । यथा → शिव + अण् = शैवः । गङ्गा + अण् = गाङ्गः । प्रौष्ठः

4. कन्यायाः कनीन च → चादण् । यथा → कन्यायाः अपत्यम् = कानीनः (व्यासः कर्णश्च) ।

5. साऽस्य देवता → स अस्य देवता, अस्मिन् अर्थे प्रथमान्तेन प्रातिपदिकेन सह अण् प्रत्ययः स्यात् । यथा → इन्द्रः देवता अस्य = ऐन्द्रः । इन्द्र + अण् ।

6. तस्य समूहः → समूहार्थे षष्ठ्यन्त समर्थेन सह अण् स्यात् । यथा → काकानां समूहः (काक + अण्) = काकम् ।

7. भिक्षादिभ्योऽण् → भैक्षम्, गार्भिणम्, यौवनम् ।

(हस्ताक्षर) 17-08-2020

डॉ० निर्मल कुमार झा (स० प्राचार्यः)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

17-08-2020

संस्कृतसामान्यम् । उपशास्त्री I

अनिवार्यपत्रम् । शब्दरूपम् । "पुष्प" ।

पुष्प शब्दः (नपुंसकलिङ्गम् | क्लीवलिङ्गम् )

| विभक्ति | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा → | पुष्पम् | पुष्पे | पुष्पाणि |
| द्वितीया → | " | " | " |
| तृतीया → | पुष्पेण | पुष्पाभ्याम् | पुष्पैः |
| चतुर्थी → | पुष्पाय | " | पुष्पेभ्यः |
| पञ्चमी → | पुष्पात् | " | " |
| षष्ठी → | पुष्पस्य | पुष्पयोः | पुष्पाणाम् |
| सप्तमी → | पुष्पे | " | पुष्पेषु |
| सम्बोधन → | हे पुष्प ! | हे पुष्पे ! | हे पुष्पाणि ! |

सर्वेषाम् अकारान्त नपुंसकलिङ्ग शब्दानां रूपम् फल शब्दा-नुसारेण भवति। यथा → पुष्प, ज्ञान, पाप, अरण्य, कलत्र, पत्र, गृह, जल, पुस्तक, दुग्ध, आम्र, मित्र, मुख, नक्षत्र आदयः।

[signature] 17-08-2020

डॉ० निर्मल कुमार झा (स० प्राचार्य)
रा० उ० सं० महा वि० सुखसेना,
पूर्णियाँ।